Register Number:

Date: 17-11-20 (A)

# ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27

## B.Sc, B.A, B.COM & BBA - III SEMESTER

## SEMESTER EXAMINATION: NOVEMBER 2020

## SA 318 - SANSKRIT

Time- 2 1/2 hrs Max Marks-70

I. समुचितं उत्तरं चिनुत । 12×1=12

अ. किं न जायते म्रियते ?

१. आत्मा २. तनुः ३. वपुः ४. कायः

आ. कः नाम योगः?

१. मेलनम् २. सुखम् ३. समत्वम् ४. युक्तम्

इ. सङ्गात् कः जायते?

१. रुचिः २. कामः ३. क्रोधः ४. अर्थः

ई. कः श्रेयः?

१. स्वधर्मे निधनम् २. स्वधर्मात् निवर्तनम् ३. स्वधर्म अकरणम् ४. स्वधर्मे जीवनम्

उ. क्षत्रियस्य श्रेयान् कर्म किम्?

१. प्रजापालनम् २. प्रजावात्सल्यम् ३. राज्यविस्तारणम् ४. धर्मयुद्धम्

ऊ. समदर्शिनः के?

१. तपस्विनः २. पण्डिताः ३. मुनयः ४. आचार्याः

ॠ. उत्तरायणस्य कालः कति मासाः?

१. मासद्वयम् २. पञ्चमासाः ३. षट् मासाः ४. सप्तमासाः

ॠ. अन्नसम्भवः कस्मात् भवति?

१. तपः प्रभावात् २. यज्ञात् ३. कृषिकार्यात् ४. पर्जन्यात्

लृ. ज्ञानिनः किम् उपदेक्ष्यन्ति?

१. तत्त्वम् २.उपदेशम् ३. ज्ञानम् ४. उत्तमविचारम्

ए. कस्य गतिः गहना विद्यते?

१. ज्ञानस्य २. धर्मस्य ३. क्षत्रियस्य ४. कर्मणः

ऐ. कः भयावहः?

१. स्वधर्मः २. परधर्मः ३. अन्यधर्मः ४. कुधर्मः

ओ. कथं कर्म करणीयम्?

१. फलस्वीकारे कर्म २. केवलं कर्मकरणीयम् ३. योगस्थं कर्म करणीयम् ४. न किमपि

II.अन्वयम् अन्वयार्थं व्याकरणं तात्पर्यं च लिखत। 3×6=18

ओ. कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः।

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥

अं. अथ केन प्रयुक्तोऽयं पापं चरति पूरूषः।

अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥

अः. ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥

क. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

III. सविस्तरं लिखत। 2×10=20

ख. एकादशोऽध्यायस्य विश्वरूपदर्शनयोगस्य वर्णनं कुरु।

ग. कर्मविषये सविस्तरं वर्णयत।

घ.आधुनिकजीवने भगवद्गीतायाः मार्गदर्शनम् अनिवार्यं वा न वा? सकारणं वर्णयत।

IV. संस्कृतभाषया अनुवादं कुरुत 10

ङ. The King asked- " What am I to do now?"

Vasistha said 'There is Nandini in my hermitage. She is Kamadhenu's daughter. Worship her. Lead the life of an ascetic(forester). You will earn her favour.

The king accepted this. He lived in a thatched hut. Sudaksina also lived along with him. The king gave up all his royal luxuries. He slept on a bed of 'darbha' grass. In the morning , accompanied by Sudaksina, he worshipped the cow. The King followed Nandini and remaining vigilant in the forest, serving the cow for twenty- one days.

V. गद्यांशं पठित्वा समुचितम् उत्तरं लिखत 5×2=10

धात्रीफलं सर्वेषु ऋतुषु लाभदायकं भवति। धात्रीफलम् 'आमलकम्' इत्यपि कथ्यते। शारीरस्य स्वास्थ्यरक्षणाय फलस्य अस्य प्रयोगः अवश्यमेव कर्तव्यः। इदं फलं नेत्रयोः ज्योतिवर्धनाय, केशानां सौन्दर्यवृद्धये, त्वचः कान्तिवर्धनाय च बहूपयोगि भवति। सामान्यतया अस्य प्रयोगः अवलेहरूपेण, उपदंशरूपेण च भवति। इदं रक्तकोशिकनिर्माणे अपि सहायकं भवति। अस्य सेवनेन शरीरे रक्ताल्पता न भवति। ग्रीष्मर्तौ फलमिदं शरीरस्य तापम् अपनयति। अस्य नियमितसेवनेन स्मरणशक्तिरपि वर्धते। प्राचीनकाले कार्तिकमासस्य नवम्यां तिथौ धात्रीवृक्षस्य अधः सहभोजस्य अपि परम्परा आसीत्। केषुचित् स्थलेषु अधुना अपि एषा परम्परा परिपाल्यते। वृक्षस्य अधः भोजनं पच्यते चेत् भोजनं सुस्वादु स्वास्थ्यवर्धकं च भवतीति अस्माकं पूर्वजानां चिन्तनमासीत्। एतदतिरिच्य सहभोजनेन प्रेम्णः भावोऽपि जागर्ति वर्धते च इत्यपि जनाः आमनन्ति। सर्वतोऽधिकं परम्परेयं धात्रीफलस्य महिमानं प्रकटीकरोति।

च. धात्रीफलं कथं बहूपयोगि अस्ति?

छ. प्राचीनकाले कीदृशी परम्परा आसीत्?

ज. 'सर्वेषु ऋतुषु' इत्यनयोः पदयोः किं विशेषणपदम्?

झ. सहभोजने कीदृशः भावः जागर्ति?

ञ. धात्रीफलस्य अपरं नाम किम्?